श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
यादवाभ्युदये महाकाव्ये

# ॥ त्रयोविंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ त्रयोविंशः सर्गः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

अथाधिकारच्यवनाद्य इन्द्राः पञ्चाभवन् पाण्डुसुताः पृथिव्याम्।
जयार्थिनस्ते जगदेकनाथं प्रपेदिरे सत्त्वधनाः सदाराः ॥ **23.1** ॥

तमोपहैस्तत्त्वविदामृषीणां वाक्यैस्त्रिवेदीमनुसञ्जिहानैः।
कृष्णं यथावत् कृतिनो विदन्तः तस्याभवन् प्राणसमाः सखायः ॥ **23.2** ॥

तदाश्रयास्तत्प्रणिधेयकृत्याः तेनैव नाथेन सदा सनाथाः।
अपारयन् योगिभिरप्यजय्यान् बाह्यान्तरान् जेतुमरातिवर्गान् ॥ **23.3** ॥

प्रतिक्रियाः प्राग्भवदुष्कृतानां प्राणोपरोधेऽपि निरुद्धपापाः।
धीरास्त्रिलोकीसुहृदः प्रसादात् विपाकरम्या विपदः प्रसेहुः ॥ **23.4** ॥

अलङ्घयन् विश्वपतेः प्रसादात् वृत्तिं पराचीमिव वीतरागाः।
अरातिभिश्छद्मविधिप्रवीणैः आपादितामग्निजलादिपीडाम् ॥ **23.5** ॥

कलिङ्गनीतिं कलहैकतानां कर्णं च पार्थेन निबद्धवैरम्।
आस्थाय दुश्शासनपूर्वजन्मा धर्मोत्तरान् जेतुमियेष पार्थान् ॥ **23.6** ॥

स राजसूयक्रतुधर्मपत्नीं भीमेन गाण्डीवभृता च मान्याम्।
द्यूतच्छलात्प्रापितदासभावां साध्वीं मुधा पर्यभवत् सभायाम् ॥ **23.7** ॥

अनन्यनाथां स्थितिमाप्नुवन्त्या नाथः स्वसम्बोधननामगर्भम्।
शुश्राव दूरान्तरितोऽपि शौरिः प्राक्रोशनं पार्थपतिव्रतायाः ॥ **23.8** ॥

मिथ्याविचारान्मिषतां गुरूणां प्रभुः सतां पाण्डवधर्मपत्नीम्।
दुश्शासनव्याकुलितोत्तरीयां अक्षय्यकौशेयवतीमकार्षीत्॥ **23.9** ॥

अवाप्तुकामाः प्रबलैररमित्रैः अक्षच्छलेनापहृतं स्वराज्यम्।
निक्षिप्तकर्तव्यभरा बभूवुः सत्त्वाधिकाः सात्वतयूथनाथे॥ **23.10** ॥

स्वातन्त्र्यगन्धद्विरदाङ्कुशेन स्वेनैव शीलेन विनीयमानः।
अनन्यलभ्यं प्रतिलम्भितोऽभूत् प्रभुः स्वयं पाण्डवदूतभावम्॥ **23.11** ॥

स तादृशीमाद्रियत त्रिधामा प्रेष्यक्रियां प्रेषितदेवबृन्दः।
ननु प्रभूणां निरपेक्षभूम्नां प्रसाधनं भक्तजने गुणत्वम्॥ **23.12** ॥

अपि प्रभूतानुगुणक्रियाभ्यः श्लाघापदं तत्त्वविदां बभूव।
अनन्यतन्त्रस्य विभोस्तदेतत् नाथोचितं नन्तृषु पारतन्त्र्यम्॥ **23.13** ॥

तपस्यतः पुत्रसमुद्भवार्थं मार्गागतं मोचयतः पिशाचम्।
अजन्मनो जन्मभृतश्च शौरेः स्वामित्वसंवादि बभूव दूत्यम्॥ **23.14** ॥

सरोषसीरायुधहेतिशक्त्या साचीकृतां कौरवराजधानीम्।
अद्यापि गङ्गासलिलप्रवाहे प्रक्रान्तपातामिव सम्प्रपेदे॥ **23.15** ॥

खद्योतवद्दर्शितखड्गदीप्तीन् प्रज्ञादृशो भूमिभृतः सभायाम्।
प्राप्तोदयो भानुरिव त्रिधामा प्रच्छादयामास कुरून् स्वधाम्ना॥ **23.16** ॥

तदागमेन प्रतिपन्नहर्षाः तद्दर्शनेनाहितपारवश्याः।
अतर्कितप्रस्मृतवैरबन्धाः वृत्तिं द्विषन्तो विदधुर्यथार्हम्॥ **23.17** ॥

उलूखले भक्तगुणे च बद्धं गुणोत्तरे गोपवधूस्तने च।
इयेष बन्धुं जगदेकबन्धुं दुर्योधनो दुस्त्यजमृत्युपाशः॥ **23.18** ॥

प्रकाशयन् किञ्चिदिवाप्रमेयः प्रभावमात्मीयमनन्यवेद्यम्।
मुहुः प्रतीपाचरणोत्सुकानां मोघाशतां मूढधियामकार्षीत्॥ **23.19** ॥

स्ववेदितं संसदि धार्तराष्ट्रे सन्धित्सतो धर्मसुतस्य वाक्यम्।
अनाददाने मुरभिन्निवृत्तः सानुग्रहो विग्रहमन्वमंस्त॥ **23.20** ॥

नरांशजुष्टेन धनञ्जयेन रथी भवन् सारथिरात्मना च।
धनुर्भृता तोत्रभृता च भेजे पृथक्त्वमैक्यं च यथाप्रमाणम्॥ **23.21** ॥

रथाधिरूढं च रथं च रक्षन् यथार्थतो दर्शयति स्म यन्ता।
त्रय्यन्तचिन्तानिरपेक्षमीशः तत्तादृशं तत्त्वविभागमाद्यम्॥ **23.22** ॥

पुरःस्थिते गोप्तरि विश्वहेतौ पश्चादवस्थायिनि तत्प्रवर्त्ये।
अनन्ययोगात् स रथो बभार प्राधीतवेद्यां प्रणवप्रवृत्तिम्॥ **23.23** ॥

प्रभुर्बभौ प्रग्रहतोत्रपाणिः कालात्मना भावितपाशदण्डः।
यदा तदा देवगणेन मेने शान्तं बलं शान्तनवप्रधानम्॥ **23.24** ॥

धुरन्धरः स्वर्गनिकेतनानां धुर्योत्थितैर्धूसरितो रजोभिः।
रराज मध्ये रथयूथपानां गोष्टे पशूनामिव गोपवेषः॥ **23.25** ॥

समुद्रसङ्घातनिभे नृपाणां सैन्यद्वये संयति संप्रवृत्ते।
अस्थानकारुण्यवशान्निवृत्तं धनञ्जयं वीतशुचं वितेने॥ **23.26** ॥

फलादपि स्वादुतमप्ररोहं प्रोत्साहने सख्युरिवोद्यतः सः।
जगद्धितार्थाय जगौ दयावान् अन्यैरविज्ञेयमनन्यधर्मम्॥ **23.27** ॥

चिरन्तनस्नेहदयादिमूलं चिन्तार्णवं निस्तरतो दुरन्तम्।
किरीटिनः केशवसूक्तिरासीत् कालोचिता काचन पोतपात्री॥ **23.28** ॥

अभङ्गुरैर्धौतफलानुषङ्गात् विद्याशरैर्विश्वगुरोरुपात्तैः।
विवेकधन्वा विषमानजैषीत् अन्तः स्थितान् जिष्णुररातिसङ्घान्॥ **23.29** ॥

उपघ्नभूतां श्रुतिवल्लरीणाम् उपास्त तुष्यन्नुपदेशमुद्राम्।
नखांशुभिः क्षिप्ततमःकलङ्कां नाथस्य पार्थो नतपूर्वभागः॥ **23.30** ॥

विभक्तसामान्यविशेषधर्मा प्रादुर्बभूवोपनिषत् प्रभोर्या।
स एव तां व्यासमुनिः समीचीं पर्यग्रहीद्भारतवेदवक्ता ॥ **23.31** ॥

अभङ्गनीयां परधर्मसत्तां अनश्वरीं भारतसूर्यदीप्तिम्।
विदुश्श्रुतीनामनघां वयस्यां गीतामसम्मूढजनाविगीताम् ॥ **23.32** ॥

कपिध्वजस्तस्य विभोरपश्यत् तदर्पितं चक्षुरवाप्य दिव्यम्।
विरिञ्चिपूर्वैरपि दुर्निरीक्षं विश्वाश्रयं रूपमशेषमूर्तेः ॥ **23.33** ॥

तस्मिन्नभिव्याप्तसमस्तलोके स तत्स्वरूपेण विकल्प्यमाने।
विडम्बितान् गोपुरधारिबिम्बैः देवान् विभोरैक्षत दिव्यदेहे ॥ **23.34** ॥

प्रख्यातदीक्षं प्रणतार्तिभङ्गे पार्थस्तदा दैत्यरिपुं प्रपन्नः।
विनाशयामास बलं रिपूणां विपत्प्रतीकारपरेण सख्या ॥ **23.35** ॥

स्वहस्तपद्माञ्चिततोत्रपाशः स्वच्छन्दलीलासहधर्मचारी।
गतागतैरप्रतिमैः स चक्रे जयश्रियो जैत्ररथेन डोलाम् ॥ **23.36** ॥

सविस्मयः संयति सव्यसाची तत्तादृशा सारथिना समेतः।
मनोजवानां निजसायकानाम् अग्रेसरं स्यन्दनमन्वपश्यत् ॥ **23.37** ॥

यथा नियच्छत्ययमिन्द्रियाश्वान् जीवाश्रये देहरथे निबद्धान्।
तथाऽर्जुनस्यन्दनधुर्यनेता बभूव नान्येन निदर्शनीयः ॥ **23.38** ॥

यदेकदेशे निखिलं तदन्यत् तद्देहभागेषु च संविभक्तम्।
रथैकदेशे तमवेक्ष्य पार्थः प्राबुद्ध तं सारथिमप्रतर्क्यम् ॥ **23.39** ॥

निवर्तितं वैरिजनोपमर्दात् न्यस्तं रथे चक्रमुपाददानः।
नतप्रतिज्ञानुपरोधहेतोः आत्मप्रतिज्ञामजहात् स्वतन्त्रः ॥ **23.40** ॥

द्विषत्प्रयुक्तं दुरपोहमस्त्रं भुजान्तरालेन विभुः प्रतीच्छन्।
विधाय वैकल्पिकवैजयन्तीं प्रच्छादितं प्राणयति स्म पार्थम् ॥ **23.41** ॥

निवेशितां तस्य पदे च पूजां निशाम्य गङ्गामिव चन्द्रमौलौ।
अनन्यसामान्यममंस्त सख्युः सङ्कोचवैदेशिकमीश्वरत्वम्॥ 23.42 ॥

दिवाकरेऽनस्तमितेऽतिगाढं तमः सृजंस्तामसमोहनार्थम्।
प्रपन्नरक्षाप्रतिपन्नदीक्षः सत्याभिसन्धं विदधे सखायम्॥ 23.43 ॥

सुरैरशेषैरपि जातरोषैः स दुर्जयान् भीष्ममुखान् जिगाय।
सहायशक्त्या युधि सव्यसाची किं दुष्करं केशवमाश्रितानाम्॥ 23.44 ॥

स्वप्नः किमासीदथवेन्द्रजालं बभूव गन्धर्वपुरी किमेषा।
इतीव शङ्कां विदधे प्रलीना पताकिनी कौरवपाण्डवानाम्॥ 23.45 ॥

आकृष्टदेवासुरसाम्परायैः ओजस्विनां शस्त्रभृतामुदन्तैः।
प्रायस्तदा प्रत्यवहारलीलं आकालिकीं विश्वभुगन्वभुङ्क्त॥ 23.46 ॥

जिघांसुरष्टादश सम्पतन्तीः अक्षौहिणीरद्भुतभीमरूपाः।
स्वतन्त्रयामास मिथःप्रतीपान् सूत्रावसक्तानिव दारुमर्त्यान्॥ 23.47 ॥

कृषीवलः स्थावरजङ्गमानां क्षेत्रे कुरूणां समकालपाकान्।
अनीकशालीन् भुजशालिवर्गैः फलोपपन्नान् प्रभुरित्यलावीत्॥ 23.48 ॥

निस्तीर्य सङ्ग्राममहासमुद्रं संसारपोतेन परेण सख्या।
धनञ्जयस्तत्पदमेव भेजे निर्धूतनीहारदिवाकराभः॥ 23.49 ॥

द्रौणिस्तदा सौप्तिकमादधानः कृपेण सार्धं कृतवर्मणा च।
हताहितैः पाण्डुसुतैरवाप्तं सैन्यावशेषं शमयांबभूव॥ 23.50 ॥

इत्थं दशाष्टौ च निपात्य भूमौ अक्षौहिणीरद्भुतभीमरूपाः।
सतां पतिः सत्त्व समृद्धिरोगात् उल्लाघितामातनुतेव पृथ्वीम्॥ 23.51 ॥

विभुः स्वसङ्कल्पहतान् विनिघ्नन् धर्मैकतानेन धनञ्जयेन।
प्रतोदसन्दंशिकयोदहार्षीत् पाञ्चालकन्यापरिभूतिशल्यम्॥ 23.52 ॥

परास्त्रविस्रंसितमुत्तरायाः पद्मासनाद्यैरपि पूजितेन।
गङ्गाधरण्योः प्रभवेन गर्भं पस्पर्श पादेन परावरेशः॥ **23.53** ॥

विप्लोषितं द्रौणिशरेण बालं सञ्जीवयन् पादरजःप्रभावात्।
वधूकृतक्षुद्रशिलाविशेषं रामानुजो राममिवान्वकार्षीत्॥ **23.54** ॥

तस्य श्रुतिश्रेणिशिरोधृतानां स्पर्शः प्रजेशादिभिरीप्सितोऽभूत्।
परीक्षिदुत्थानपरीक्षितानां अघच्छिदामङ्घ्रिरजःकणानाम्॥ **23.55** ॥

अजातदीनां द्रुपदोद्भवायाः कालस्य दीप्तामिव खड्गरेखाम्।
विपक्षसंहारमहाभुजङ्गीं वेणीं प्रियैः संशमयांबभूव॥ **23.56** ॥

पितामहाय प्रततान पार्थः शरप्रयुक्तं शयनं यदग्र्यम्।
योगासनं योजितचित्तधैर्यं तदेव पर्याप्तगुणं तदाऽऽसीत्॥ **23.57** ॥

विन्यस्य धर्मतनये विजयाधिकारं
    सख्याऽर्जुनेन यशसेव धनुर्धराणाम्।
दध्मौ स दैत्यमथनो युधि पाञ्चजन्यं
    वृष्ण्यन्धकादिपरिशेषितभूमिभारः॥ **23.58** ॥

प्रत्यानिनाय रथमात्तजयः स जन्यात्
    धन्यावलोकनधनञ्जयदर्शनीयः।
सारथ्यसंविदवधीरितहेतिजुष्टः
    सेनापरागपरिधूसरकुन्तलश्रीः॥ **23.59** ॥

आलिङ्ग्य गाढमवगाढरसं रणाब्धौ
    वीरव्रणैः कृतविभूषणमिन्द्रसूनुम्।
अन्यावतारपरिकल्पनकेलिलोभात्
    ऐक्यं निनाय निजमंशमिवान्यनिष्टम्॥ **23.60** ॥

रणभुवि शरतल्पे लीलया शायितेन
स्वपदसमुदितायाः सूनुना सिद्धसिन्धोः।
अनतिचिरविलम्बादाप्तुकामं धरित्रीं
कलिमिव शमयिष्यन् ख्यापयामास धर्मान्॥ **23.61** ॥

अप्रत्यूहितसार्वभौमविभवैरभ्यर्चितः पाण्डवैः
प्रत्यावृत्तमहोत्सवेन मुदितां प्राप्तः पुरीं द्वारकाम्।
प्रत्यक्षं प्रथयाम्बभूव विहरन् प्रीतः प्रियाभिः समं
शुद्धः सामपदागमैरधिगतां स्वाधीनतां श्रीपतिः॥ **23.62** ॥

॥ इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
यादवाभ्युदये महाकाव्ये त्रयोविंशः सर्गः॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥